संस्कृतवार्ता:
12.06.2024
सायम् - 06:20

**मुख्यवार्ता:**

- तेलुगु-देशम् पार्टीति दलस्य प्रमुख: नाराचन्द्रबाबू नायडु: अद्य कृष्णा मण्डलस्य केसरपल्ली इत्यत्र आंध्र प्रदेशस्य मुख्यमंत्रित्वेन शपथ ग्रहणं कृतवान्।
- प्रधानमंत्री नरेंद्रमोदी जी-सप्त शिखरसम्मेलने सम्मिलितुं श्वः इटलीं प्रयास्यति ।
- प्रधानमन्त्रीनरेन्द्रमोदी विदेश-मंत्री सुब्रह्मण्यम-जयशंकरः च कुवैत-नगरे दुरापन्ने भीषणे आग्निकाण्डे महद्-दुःखं व्यक्तमकुरुताम्।
- अष्टादशतम्याः लोकसभायाः प्रथम-सत्रम् अस्य मासस्य चतुर्विंशति-दिनाङ्कात् समारप्स्यते।
- आईसीसी टी-विंशति-क्रिकेट-विश्व-चषके अद्य सायं भारतीयदलं अमेरिकादलं सम्मुखीकरिष्यति ।

**नायडु शपथग्रहण :**

तेलुगु देशम पार्टीति दलस्य प्रमुख: नाराचन्द्रबाबू नायडु: अद्य कृष्णा मण्डलस्य केसरपल्ली इत्यत्र आंध्र प्रदेशस्य मुख्यमंत्रित्वेन शपथ ग्रहणं कृतवान्। प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीयगृहमन्त्री अमितशाहः, एनडीए-दलस्य नेतारः च शपथग्रहणसमारोहे उपस्थिताः आसन्। तेलुगुदेशमदलस्य प्रमुखः नाराचन्द्रबाबूनायडुः कृष्णमण्डलस्य केसरपल्ली-आइटीपार्क इत्यत्र अद्य प्रातः सप्तविंशतिः निमेषाधिक एकादशवादने राज्यस्य राज्यपालः एस अब्दुलनजीरः आन्ध्रप्रदेशस्य मुख्यमन्त्रीरूपेण शपथग्रहणं कारितवान्। तेनैव सह जनसेनादलस्य त्रयः, भारतीयजनतादलस्य एकं च समेत्य चतुर्विंशति नवनिर्वाचितसदस्याः मन्त्रिपरिषदः शपथग्रहणं कृतवन्तः। प्रधानमन्त्री नरेन्द्रमोदी मुख्यातिथिरूपेण कार्यक्रमे उपस्थितः आसीत्। कार्यक्रमे उपस्थिताः अन्ये गणमान्यजनाः केन्द्रीयगृहमन्त्री अमितशाहः, केन्द्रीयस्वास्थ्यमन्त्री तथा भाजपादलस्य अध्यक्षः जेपी नड्डा, केन्द्रीयमार्गपरिवहनमन्त्री तथा च वरिष्ठभाजपानेता नितिनगडकरी, केन्द्रीयकृष्णाङ्गार उत्खननमन्त्री जी किशनरेड्डी,केन्द्रीयमन्त्रिणः एनडीएसहयोगिनं च समेत्य चिराग पासवान, रामदास अथवाले, अनुप्रिया पटेल, महाराष्ट्र मुख्यमंत्री एकनाथ शिंदे, भारतस्य पूर्व उपराष्ट्रपति एम वेंकैया नायडु, भारतस्य पूर्व मुख्यन्यायाधीशः एन.वी. रमण: च उपिस्थत: आसीत्।

**प्रधानमंत्री-इटलीयात्रा**

प्रधानमंत्री नरेंद्रमोदी जी-सप्त शिखरसम्मेलने सम्मिलितुं श्वः इटलीं प्रयास्यति । विदेश-सचिवः विनय-क्वात्रा नवदिल्ल्यां प्रावोचत् यत् शुक्रवासरे जाय़माने सम्मेलने भारतं एकेन विकासोन्मुख-देशस्य रूपेण आमंत्रितम् अस्ति । सः प्रोक्तवान यत् इयं यात्रा भारताय वैश्विक-दक्षिणक्षेत्राय च महत्वपूर्णविषयेषु वैश्विक-नेतृभिः सह सुदृढ-सम्बन्ध-निर्माणस्य अवसरं प्रदास्यति ।शिखर-सम्मेलने भारतस्य इयं एकदशतमः श्री-मोदिनः च निरन्तरं पञ्चमः भागग्रहणावसरः भविष्यति । प्रधानमंत्री अस्मिन् सत्रे सम्मिलितः भविष्यति । सम्मेलनम्

अतिरिच्य, श्रीमोदिनः जी-सप्त-देशानां नेतृभिः सह द्विपक्षीयोपवेशनं अपि सम्भाव्यते। श्रीमोदी इटली-देशस्य प्रधानमंत्रिणा जियोर्जिया-मेलोनी इत्यनया सह उपवेशनं करिष्यति । विदेश-सचिवः प्रावोचत् यत् भारतं स्विट्जरलैंड-देशे आयोक्ष्यमाणे यूक्रेन-शांति-शिखर-सम्मेलन उचित-स्तरे सम्मिलितं भविष्यति।अस्मिन् मासे स्विट्जरलैंडे आयोक्ष्यमाणे सम्मेलने न्यूनातिन्यूनः नवति देशाः सम्मिलिताः भविष्यन्ति ।

## जयशंकरः- कुवैत

प्रधानमन्त्रीनरेन्द्रमोदी विदेश-मंत्री सुब्रह्मण्यम-जयशंकरः च कुवैत-नगरे दुरापन्ने भीषणे आग्निकाण्डे महद्-दुःखं व्यक्तमकुरुताम्। अस्यां दुर्घटनायां चत्वारिशदधिकजनाः कालग्रासभूताः अभवन् सहैव पञ्चशदधिकजनाः व्रणिताः सन्ति। श्रीजयशंकरः आश्वासनं प्रदत्तवान् यत् कुवैते भारतीय-दूतावासः प्रभावितेभ्यः सर्वेभ्यः जनेभ्यः साहाय्यं प्रदास्यति ।

## लोकसभासत्रारम्भम्

अष्टादशतम्याः लोकसभायाः प्रथम-सत्रम् अस्य मासस्य चतुर्विंशति-दिनाङ्कात् समारप्स्यते।अस्मिन् सत्रे नवनिर्वाचित-सदस्यानां शपथग्रहणं, अध्यक्षनिर्वाचनम्, राष्ट्रपत्याभिभाषणं चर्चा च भविष्यति अपरत्र राज्यसभायाः चतुष्षष्ट्युत्तर-द्विशततमस्य सत्रस्य समारम्भम् अपि अस्य मासस्य सप्तविंशति-दिनांके भविष्यति। आगामि-संसत्सत्रम् अग्रिम-मासस्य त्रि-दिनाङ्के भविष्यति। केंद्रीय-संसदीय-प्रकरण-मंत्री किरेन-रिजिजू प्रावोचत् यत् देशस्य नागरिकैः निर्णयः स्वीकृतः अस्ति सहैव देशसेवायै कार्यनिष्पादनम् अस्माकङ्कर्तव्यम् अस्ति। श्री-रिजिजू प्रोक्तवान् यत् चत्वारिंशदधिकैकशतकोटिभारतीयानामाकाङ्क्षाम्पूरयितुं चर्चायै संसत्सदनं एकः आदर्शमञ्चः वर्तते ।

## निर्मला-सीतारमण-कार्यभारग्रहणम्

निर्मला-सीतारमण अद्य नवदिल्ल्यां केंद्रीय-वित्तमन्त्रालयस्य, उद्योग-कार्य-मन्त्रालयस्य च कार्यभार-ग्रहणं कृतवती। तया केंद्रीय-वित्त-उद्योग-कार्य-मन्त्रित्वेन पुनरवसरं प्रदातुं प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति कार्तज्ञं प्रकटितम्। सा अकथयत् यत् श्रीमोदिना विगतेषु दशवर्षेषु सुदृढ-नेतृत्वं विकासोन्मुख-शासनं च प्रदत्तम् अस्ति, याभ्यां विभिन्न-क्षेत्रेषु विभिन्नपरिवर्तनानि अभवन् अपि च भारतं सुदृढार्थव्यवस्था सञ्जातम्। श्रीमती-सीतारमण प्रोक्तवती यत् सर्वकारः स्वकीयनागरिकेभ्यः सुगमजीवनं प्रदातुं पूर्ण-प्रतिबद्धम् अस्ति। सा प्रावोचत् यत् चतुर्दशोत्तर-द्विसहस्रतमाब्दानन्तरं समारब्धानि विकासकार्याणि यथापूर्वं प्रवर्तिष्यन्ते यैः अर्थव्यवस्थायां व्यापकार्थिक-स्थैर्यम् विकासः च प्रदास्यते। वित्त-मंत्रिणा राष्ट्रीय-जनतांत्रिक-गन्थिबंधन-सर्वकारस्य विकासोन्मुखसङ्कल्पे नवीनोर्जया सह कार्यनिष्पादितुं, प्रधानमंत्रिणः 'विकसितभारतम्' इति परिकल्पना पूरयितुम् उत्तरदायिनीतिनिर्धारणं सुनिश्चेतुं च विभागः निर्दिष्टः। श्रीनितिन-गडकरी अपि अद्य मार्ग-परिवहन-राजमार्ग-मंत्रित्वेन पदभारम् अलङ्करोत्। अस्मिन्नवसरे श्री-गडकरी मोदीसर्वकारस्य तृतीय-कार्यकाले दायित्वनिर्धारणाय प्रधानमंत्रिणे आभारम् अभिव्यक्तमकरोत्। सः प्रोक्तवान् यत् श्रीमोदिनः दूरदर्शी-नेतृत्वे भारतं विश्वस्तरीय-आधुनिकाधारभूतनिर्माणेन सुसज्जितं भविष्यति ।

## नीट-(यूजी)परीक्षा

राष्ट्रीय-परीक्षा-अभिकरणेन नीट-(यूजी)परीक्षायाः परिणाम-घोषणायाः अनन्तरं सामान्यतः पृच्छ्यमाणानां प्रश्नानाम् एका प्रश्नावलिः प्रकाशिता अस्ति । अस्य मासस्य चतुर्थ-दिनाङ्के घोषितेषु नीट-परीक्षा-परिणामेषु कथितानियमितताम् अधिकृत्य एषा प्रश्नावलिः प्रकाशिता अस्ति। परीक्षार्थिभ्यः समयहानिने कृपांकं प्रदातुं शङ्का-निवारण-समित्याः भूमिकाम् अधिकृत्य अभिकरणेन प्रोक्तं यत् एका समितिः विनिर्मिता आसीत् अपि च समित्या तथ्यात्मक-सूचनानुसारं शङ्कासु विचारः कृतः। कः अपि परीक्षार्थी परीक्षायां अष्टादशोत्तर-सप्तशताङ्कान् , नवदशोत्तर-सप्तशताङ्कान् च कथं प्राप्तुं शक्नोति ? अस्य प्रश्नस्य प्रत्युत्तरे अभिकरणेन स्पष्टीकृतं यत् कृपांकप्रदानेन द्वौ परीक्षार्थिनौ क्रमशः अष्टादशोत्तर-सप्तशताङ्कान् , नवदशोत्तर-सप्तशताङ्कान् च प्राप्तवन्तौ। अभिकरणेन इदमपि प्रोक्तं यत् केवलं त्रिषष्ट्युत्तर-पञ्चदशशतं परिक्षार्थिनः एव समय-हानिं विरुध्य कृपांकान् प्राप्तवन्तः। अवधेयं यत् केंद्रीय-शिक्षा-मंत्रालयः नीट-परीक्षायां पञ्चदशशततोऽधिकेभ्यः परीक्षार्थिभ्यः प्रदत्तानां कृपाङ्कानां समीक्षायै चतुर्सदस्यानां एका समितिः विनिर्मिता आसीत्।

## जम्मू-कश्मीरः

जम्मू-कश्मीरस्य जम्मूसम्भागस्य कठुआ-डोडा-जनपदयोः रात्रौ जाते परस्परसङ्घर्षे सीआरपीएफ्-आरक्षिबलस्य एकः सैनिकः दिवङ्गतः षट्-सैनिकाः च व्रणिताः आभवन्। आकाशवाण्याः जम्मूसम्वाददातृणा सूचना प्रदत्ता यत् डोडा-जनपदस्य भद्रवाह-पठानकोट-मार्गे चटरगल्लायाः उपरिक्षेत्रे एकस्मिन् संयुक्तान्वीक्षणारक्षिकेन्द्रोपरि आतङ्किभिः कृते प्रहारे राष्ट्रीय-राईफल्स्-इत्यस्य पञ्च-सैनिकाः आरक्षिबलस्य एकः विशिष्टाधिकारिः च व्रणिताः अभवन्। जम्मू-कश्मीरे कठुआजनपदस्य हीरानगर-क्षेत्रे सैदा-सोहल-ग्रामे सेनायाः आतंकिनां च मध्ये जाते सङ्घर्षे अन्योऽपि एकः आतङ्किः मारितः। अनेन सहैव अधुना यावत् त्रयः आतङ्किनः व्यापादिताः सन्ति। सुरक्षाबलैः सङ्घर्षक्षेत्रात् अस्त्रशत्राणि विस्फोकादीनि च प्राप्तानि। अन्यस्य एकस्य आतङ्किनः अन्वेषणाभियानं प्रचलति ।

## विश्व-बैंकः-भारतीयार्थव्यवस्था

विश्व-बैंकेन प्रख्यापितं सूचनाप्रपत्रानुसारं, भारतं आगामि-वित्तवर्षत्रयेषु षट्-दशमलव-सप्तप्रतिशन्मितेन स्थिर-विकासेन सह विश्वस्य द्रुतगत्या विर्धमाना अर्थव्यवस्था भविष्यति। इयं वृद्धिः गृहापूर्तिः, निवेशवृद्धिः , सेवाक्षेत्रेण सम्पृक्ताः गतिविधियः चेत्यादिभिः प्रेरिता अस्ति। वैश्विक-आर्थिक-संभावना-प्रपत्रे विश्व -बैंकेन आगामि-वित्तीय-वर्षाय भारतस्य विकासस्य पूर्वानुमानं षट्-दशमलव-षट्-प्रतिशन्मितं पूर्ववत् संस्थापितम् अस्ति।

## भारतीय-सेना-कारगिल

भारतीय-सेना अद्य पैन-इंडिया मोटरसाइकिलयात्रा इति अभियानं समारब्धवान्। इयं यात्रा नवनवत्युत्तरनवदशतमे वर्षे जाते कारगिल-युद्धे पाकिस्तानं विरुध्य भारतस्य विजयम् अधिकृत्य पञ्चविंशति-वर्षपूर्त्यावसरे प्रवर्तते। रक्षा-मंत्रालयः प्रोक्तवान् यत् इदं अभियानं देशस्य वीर-सैनिकानां महत्वपूर्ण-योगदानं प्रदर्शितं कर्तुं तेषां सम्मानं च कर्तुं कार्यं करोति।

## टी-विंशति-क्रिकेट-विश्व-चषकः

आईसीसी टी-विंशति-क्रिकेट-विश्व-चषके अद्य सायं भारतीयदलं अमेरिकादलं सम्मुखीकरिष्यति। इयं स्पर्धा न्यूयॉर्कस्य नासाउ-काउंटी-अंतर्राष्ट्रीय-क्रिकेट-स्टेडियम् इति क्रीडाङ्गणे क्रीडिष्यते। द्वयेव दले विगतं स्पर्धाद्वयं विजित्य अजेयो भूत्वा स्पर्धिष्येते

।। इति वार्ता: ।।